सप्तमः पाठः

# भीष्म–प्रतिज्ञा

## प्रथमं दृश्यम्

स्थानं राज-भवनम्

(उदासीनः चिन्तानिमग्नश्च देवव्रतः प्रविशति)

देवव्रतः – (स्वगतम्) अहो, न जाने केन कारणेन अद्य मे पितृचरणाः चिन्ताकुला उदासीनाश्च विलोक्यन्ते। किं तेषां काचित् शारीरिकी पीड़ा अथवा किमपि मानसिकं कष्टं वर्तते। तत् अमात्यसमीपे गत्वा पितुः शोककारणं पृच्छामि। पितुश्चिन्ताया अपनयनं तस्य प्रसादनं च पुत्रस्य प्रधानं कर्तव्यं भवति।

पिता स्वर्गः पिता धर्मः पिता हि परमं तपः।
पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः॥
धिक् तं सुतं यः पितुरीप्सितार्थं क्षमोऽपि सन्न प्रतिपादयेद् यः।
जातेन किं तेन सुतेन कामं पितुर्न चिन्तां हि समुद्धरेद् यः॥

## द्वितीयं दृश्यम्

स्थानम्- अमात्यभवनम्

अमात्यः – (आयान्तं भीष्मं दृष्ट्वा) अहो, राजकुमारः देवव्रतः। आगम्यताम्, अलंक्रियतामासनमिदम्। (देवव्रतः प्रणम्य उपविशति) राजकुमार! कुतो नाम एतस्मिन् असमये अत्र आगमनं भवतः?

देवव्रतः - अमात्यवर्याः। अद्य किमपि नूतनं वृत्तं दृष्ट्वा विस्मितमानसः तत्समाधानाय भवत्समीपं समुपागतोऽस्मि।

अमात्यः - (साश्चर्यम्) तत् किमिति?

देवव्रतः - विद्यमानेष्वपि समस्तेषु सुखसाधनेषु न जाने अद्य केन हेतुना मम पितृपादाः दुःखिताः चिन्ताकुलचेतसश्च प्रतीयन्ते। तदेतस्य कारणमहं ज्ञातुमिच्छामि, ज्ञात्वा च तस्य प्रतीकारं कर्तुमिच्छामि।

अमात्यः - उचितमेवैतद् भवादृशानामार्यपुत्राणाम्।

देवव्रतः - तद् यदि भवन्तः एतस्य कारणं जानन्ति तर्हि तत्प्रकाशनेन अनुग्रहीतव्योऽस्मि।

अमात्यः - राजकुमार! बाढं जानामि। एतस्य कारणं तु आर्यपुत्र एवास्ति।

देवव्रतः - (साश्चर्यम्) अहमेव कारणम्? हा धिक्। तत् कथमिव? स्पष्टं निगद्यताम्।

अमात्यः - राजकुमार! एकस्मिन् दिने महाराजः वनाविहारखेलायां यमुनानदीतीरे परिभ्रमति स्म। तदानीं दूरादेव स्वशरीरसुगन्धेन निखिलमपि वनं सुवासयन्ती एका सत्यवती नाम्नी परमसुन्दरी धीवरराजकन्या तस्य अकस्मात् दृष्टिपथं गता। ततस्तस्या अद्भुतेन रूपेण विस्मयजनकेन सुगन्धेन च मुग्धो महाराजस्तया सह विवाहं कर्तुकामस्तस्याः पितरम् अयाचत।

देवव्रतः - ततस्तेन किं कथितम्?

अमात्यः - ततस्तेन कथितम्- महाराज! ईदृशः सम्बन्धः कस्य अप्रियो भविष्यति परन्तु अहं भवता सह सत्यवत्याः तदैव विवाहं करिष्यामि यदा भवदनन्तरं अस्याः एव पुत्रो राजा भविष्यति इति भवान् प्रतिज्ञां कुर्यात्।

देवव्रतः - ततो महाराजः किम् अवोचत्?

अमात्यः - ततो महाराजः किमपि उत्तरं न दत्तवान्। ततश्च आगत्य "कथं ज्येष्ठं पुत्रं विहाय सत्यवतीसुताय राज्यं देयम् प्रतिज्ञाऽभावे च कथं सत्यवती लभ्यते" इत्येव अहर्निशं चिन्तयति। इदमेव तस्य चिन्तायाः दुःखस्य च कारणं वर्तते।

देवव्रतः - महामात्य! यदि एतावन्मात्रमेव कारणं वर्तते तर्हि सर्वथा अकिञ्चित्करमेतत्। इदानीमेव अहं तस्य अपनयनाय उपायं करोमि।

(प्रणम्य निष्क्रान्तः)

## तृतीयं दृश्यम्

**( वने धीवरराजस्य समीपे देवव्रतस्य गमनं भवति,**

**धीवरः जलनिरीक्षण-परायणस्तिष्ठति )**

धीवरः - (देवव्रतं दृष्ट्वा-स्वगतम्) अहो तेजस्विता अस्य कुमारस्य। (प्रकटम्) कुमार! भवतः परिचयम् आगमनकारणं च ज्ञातुमिच्छामि।

देवव्रतः - दाशराज! महाराजस्य शन्तनोः प्रियः पुत्रोऽहं देवव्रतनामा। इदं च मम आगमनकारणम्। अस्ति काचित् भवतो दुहिता सत्यवती नाम परमसुन्दरी।

धीवरः - आम्, अस्ति एका।

देवव्रतः - तया सह विवाहार्थम् अस्माकं तातपादाः चिन्ताकुलाः सन्ति। तद् भवान् सत्यवतीप्रदानेन महाराजं चिन्तामुक्तं करोतु इति निवेदनं कर्तुम् अहं भवतः समीपमुपागतोऽस्मि।

धीवरः - महाराजकुमार! भवतः पितुश्चिन्ताया अपनयनस्य उपायस्तु भवतामेव हस्ते वर्तते।

देवव्रतः - तत् कथमिव?

धीवरः - यतो हि महराजशन्तनोः पश्चात् सत्यवतीपुत्र एव यदा राज्याधिकारी भविष्यति तदैव अहं तस्या महाराजेन सह विवाहं करिष्यामि इति मे प्रतिज्ञा अस्ति। भवन्तश्च महाराजस्य ज्येष्ठपुत्रा इति धर्मत एव राज्याधिकारिणः। तत् कथमहं सत्यवतीपुत्रस्य राज्यलाभं सम्भावयामि? इयमेव सत्यवतीप्रदाने महती बाधा अस्ति।

देवव्रतः - सदार्ढ्यम् ! दाशराज! इयं काचिद् बाधा नास्ति। भवतः प्रतिज्ञापूरणाय अहं बद्धपरिकरोऽस्मि। महाराजानन्तरं सत्यवतीपुत्र एव राज्याधिकारी भविष्यति इत्यहं शतशः सर्वषां पुरस्तात् उद्घोषयाम। तद् भवान् निर्भयो भूत्वा विवाहाय कृतनिश्चयो भवतु।

धीवरः - सत्यमेतत्। नास्ति भवतः प्रतिज्ञायां मम सन्देहलेशोऽपि। परन्तु भवदनन्तरं यदि भवतः कश्चित् पुत्रो भवत्प्रतिज्ञाभङ्गं कुर्यात् तर्हि सत्यवतीपुत्रस्य का गतिः भविष्यति?

देवव्रतः - अस्तु नाम, इममपि भवतो भयं सन्देहं च अहं निवारयामि। सत्यवतीसूनुरेव राज्याधिकारी भविष्यति इति पूर्वमेव प्रतिज्ञातं मया। तथापि यदि ते मनसि एतादृशी आशङ्का वर्तते तर्हि पुनरपि अहं भीषणं प्रणं करोमि यत् अहं कदापि विवाहं न करिष्यामि, आजीवनं च अखण्डितं ब्रह्मचर्यव्रतं धारयिष्यामि।

अद्य प्रभृति मे दाश! ब्रह्मचर्यं भविष्यति।
अपुत्रस्यापि मे लोका भविष्यन्त्ययया दिवि॥

अपि च-

परित्यजेवं त्रैलोक्यं राज्यं देवेषु वा पुन।
यद्वाऽप्यधिकमेताभ्यां न तु सत्यं कदाचन॥
त्यजेच्च पृथिवी गन्धम् आपश्च रसमात्मनः।
ज्योतिस्तथा त्यजेद् रूपं वायुः स्पर्शगुणं त्यजेत्॥
प्रभां समुत्सृजेदर्को धूमकेतुस्तथोष्मताम्।
त्यजेत् शब्दं तथाऽकाशः सोमः शीतांशुतां त्यजेत्॥
विक्रमं वृत्रहा जह्यात् धर्मं जह्याच्च धर्मराट्।
न त्वहं सत्यमुत्स्त्रष्टुं व्यवसेयं कथञ्चन॥

(नेपथ्ये साधुवादः आकाशात् पुष्पवृष्टिश्च भवति)

**धीवरः** -(बद्धाञ्जलिः) अहो राजकुमार! धन्योऽसि, आदर्शपुत्रोऽसि। भवादृशैरेव पुत्रैः इयं भारतवसुन्धरा आत्मानं धन्यधन्यां मनुते। महानुभाव। गम्यतामिदानीम्। अचिरादेव अहं महाराजस्य मनोरथं पूरयामि।

## अभ्यासः

1. देवव्रतः कः आसीत्?
2. देवव्रतः कां प्रतिज्ञाम् अकरोत्?
3. सत्यवती कस्य दुहिता आसीत्?

★★★